ल्काकृति विक्षिपन्वनेषु" किरा०। उल्काकारगणसुक्तम् श्रीपतिना "यासां गतिर्दिवि भवेन्नियतेन गस्या तास्तारकाः सकलखेचरतोऽतिदूरे। तिष्ठन्ति या अनियतोन्नतयश्च ताराश्चन्द्रादधोहि निवसन्ति तदन्विताश्च। शीतांशुवज्जलमयास्तपनात् स्फुरन्ति ताश्चावहप्रवहमारुतसन्निसंस्थाः। पूर्व्वानिलैस्तिमितभावमुपागतेऽस्मिंस्ताराः पतन्ति कुहचिद्गुरुतावशेन"। (ज्वलत्काष्ठेरनुड़ा) २शुष्कतृणवस्त्रादिदीपिते (मशाल) इति प्रसिद्धे ३दीपभेदे च। "तुलाराशिं गते भानौ अमावास्यां नराधिपः। स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च। कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुड़ादिभिः। ततोऽपराह्णसमये घोषयेन्नगरे नृपः। लक्ष्मीः संपूज्यतां लोका! उल्काभिश्चापि वेष्ट्यताम्" ति०त०ज्यो० उल्कादाने दर्शद्वैधे निर्णयः। "तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः। उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्" ति०त०ज्यो०वचनात् प्रदोषव्यापिदर्शे कार्य्यम्। उभयत्र प्रदोषप्राप्तौ परदिने एव, युग्मादिशास्त्रात्। "दण्डैकरजनीयोगो दर्शस्य स्यात् परेऽहनि। तदा विहाय पूर्व्वेद्युः परेद्युः सुखरात्रिकः" ज्योतिर्वचनाच्च। उभयत्र प्रदोषाप्राप्तावपि उल्कादानं पूर्व्वोक्तपार्व्वणानुरोधात्, न पूर्व्वदिने भूताहे ये प्रकुर्वन्ति उल्काग्रहमचेतसः। निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्" ज्योतिर्वचनात्। उल्काग्रहणादि पितृकृत्यत्वात् प्राचीनावीतिना दक्षिणाभिमुखेन कार्य्यम्। "प्राचीनवीतिना सम्यगपसव्यमतन्द्रिणा। पित्र्यमा निधनात् कार्य्यं विधिवद्दर्भपाणिना" मनूक्तेः। तद्दानमन्त्रादि ति०त०द्रष्टव्यम्। ४ज्योतिषोक्ते नाक्षत्रिकदशाभेदे। "मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा। उल्का सिद्धा सङ्कटा च ह्यष्टौ ज्ञेया महादशाः" ज्यो०। तदानयनञ्च "वह्निभान्मीननक्षत्राज्जन्मर्क्षाच्छिवभादथ" इत्युक्तेः मतभेदेन कृत्तिकानक्षत्रात् पूर्व्वभाद्रपदचतुर्थपादात् जन्मनक्षत्राद्वाऽऽरभ्य एकैकास्त्रिरावृत्त्या क्रमेण मङ्गलादिका दशा भवन्ति इत्येवं चतुर्विंशतिनक्षत्रेषु त्रिरावृत्त्या अष्टौ दशा अवसेयाः ततोऽन्तिमत्रिभेषु मङ्गलाद्यास्तिस्रो भवन्ति। एवमन्यत्राप्यूह्यम्। तासां भोगकालश्च। "एकाद्येकोत्तरा अष्टयोगिनीवत्सरा मताः" इत्युक्त्या मङ्गलायाः १एकोवर्षः पिङ्गलायाः २द्वौ, धान्यायास्त्रयः, भ्रामर्याः ४वर्षाः, भद्रिकायाः पञ्च, उल्कायाः षट्, सिद्धायाः सप्त, सङ्कटायाः अष्टौ वर्षाः, तेषां योगेन ३६वर्षा मङ्गलाद्यानां भोगकाला, इत्येवं त्रिरावृत्त्या अष्टोत्तरशतवर्षास्तासां भोगकालः। अन्तर्दशादिकं योगिनीशब्दे वक्ष्यते।

**उल्काचक्र** न० रुद्रयामलोक्ते ग्राह्यमन्त्रशुभाशुभज्ञापकचक्रभेदे "उल्काचक्रं सर्वसारं मन्त्रदोषादिनिर्णयम्। मत्स्याकारमूर्द्धमुखं सर्वमन्त्रादिविग्रहम्। स्कन्धदेशावधि नाथ! पुच्छपर्य्यन्तमेव च। अकाराक्षरमारभ्य द्वादशाक्षरमात्रकम्। विलिखेत् पृष्ठदेशे तु शुभाशुभविशुद्धये। त्रयोदशाक्षरान्नाथ! एकविंशाक्षरान्तकम्। नेतव्यं साधकैर्मन्त्रं पृष्ठस्थं समुदाहृतम्। तथा श्रीशुभदं प्रोक्तं कण्ठादिपुच्छकान्तकम्। द्वाविंशादि चतुस्त्रिंशदक्षरान्तं शुभं मनुम्। पुच्छस्थं नापि गृह्णीयान्मुखस्थञ्च तथा ध्रुवम्। शीर्षस्थञ्चापि गृह्णीयात् तदक्षरं शृणु प्रभो!। पञ्चत्रिंशादि द्वाचत्वारिंशद्वर्णान्तमेव च। मस्तकस्थं शुभं प्रोक्तं मुखवर्णान् शृणु प्रभो। त्रिचत्वारिंशवर्णादि एकपञ्चाशदन्तकम्। मुखस्थमन्त्रं मन्त्री तु न गृह्णीयात् कदाचन। पुच्छस्थं शृणु यत्नेन निरर्थकमहार्त्तिदम्। भ्रमो गात्रस्य पीडाभिः देवता कुप्यतेऽनिशम्। द्विपञ्चाशदक्षरादि एकषष्टिसमान्तिकान्। वर्णान् पुच्छस्थितान् प्रोक्तान् नेत्रस्थान् शृणु वल्लभ!। द्विषष्टितमवर्णादि चतुषष्ट्यक्षरान्तकम्। अङ्गं लोचनमन्त्रञ्च ततोऽन्यत् रसनास्थितम्। तत् सर्वं शुभदं प्रोक्तं एतदन्यतमं शृणु। वैष्णवानाञ्च शैवानां शाक्तानां मन्त्रजापनम्। अन्यदेवेषु भक्तानां भक्तिमुक्तिप्रदं नृणाम्"। "एतच्च चतुषष्टिस्त्रिषष्टिर्वा वर्णाः सम्भवतोमताः। स्वराविंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृताश्चाष्टौ चत्वारश्च यमास्तथा। अनुस्वारो विसर्गश्च+कँपौ चापि पराश्रितौ। दुस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च" इति शिक्षोक्तविभागाभिप्रायं चतुःषष्टेरन्यकथनम् लृकारस्य दीर्घसत्त्वमतेनेति बोध्यम्।

**उल्काजिह्व** पु० उल्केव जिह्वाऽस्य। रामा०प्रसिद्धे राक्षसभेदे

**उल्कामुख** पु० उल्केव मुखमस्य। प्रेतभेदे "वान्ताश्युल्कामुखः प्रेतो विप्रोधर्म्मात् स्वकात् च्युतः" मनुः (स्याक्‌सेओयालि) इति प्रसिद्धे जन्तुभेदे स्त्री ङीष्।

**उल्कुषी** स्त्री उल्—दाहे क्विप् उला दाहेन कुष्णाति कुष—क गौ० ङीष्। उल्कायाम्। "अशनिरेव प्रथमोऽनुयाजः ह्रादुनिर्द्वितीय उल्कुषी तृतीयः"। "उल्कुष्यस्तु जहीति तृतीयम्" "उल्कुषीह तमनुयाजोहन्ति" शत०